श्री शिव पंचरत्न स्तुतिः (कृष्ण कृतं)

श्री शिव पंचरत्न स्तुतिः (कृष्ण कृतं)

श्री कृष्ण उवाच |
मत्तसिंधुरमस्तकोपरि नृत्यमानपदांबुजं
भक्तचिंतितसिद्धिदानविचक्षणं कमलेक्षणं |
भुक्तिमुक्तिफलप्रदं भवपद्मजाच्युतपूजितं
कृत्तिवाससमाश्रये मम सर्वसिद्धिदमीश्वरं || 1 ||

वित्तदप्रियमर्चितं कृतकृच्छ्रतीव्रतपश्चरैः
मुक्तिकामिभिराश्रितैर्मुनिभिर्दृढामलभक्तिभिः |
मुक्तिदं निजपादपंकजसक्तमानसयोगिनां
कृत्तिवाससमाश्रये मम सर्वसिद्धिदमीश्वरं || 2 ||

कृत्तदक्षमखाधिपं वरवीरभद्रगणेन वै
यक्षराक्षसमर्त्यकिन्नरदेवपन्नगवंदितं |
रक्तभुग्गणनाथहृद्भ्रमरांचितांघ्रिसरोरुहं
कृत्तिवाससमाश्रये मम सर्वसिद्धिदमीश्वरं || 3 ||

नक्तनाथकळाधरं नगजापयोधरनीरजा-
-लिप्तचंदनपंककुंकुमपंकिलामलविग्रहं |
शक्तिमंतमशेषसृष्टिविधायकं सकलप्रभुं
कृत्तिवाससमाश्रये मम सर्वसिद्धिदमीश्वरं || 4 ||

रक्तनीरजतुल्यपादपयोजसन्मणिनूपुरं
पत्तनत्रयदेहपाटनपंकजाक्षशिलीमुखं |
वित्तशैलशरासनं पृथुशिंजिनीकृततक्षकं
कृत्तिवाससमाश्रये मम सर्वसिद्धिदमीश्वरं || 5 ||

यः पठेच्च दिने दिने स्तवपंचरत्नमुमापतेः
प्रातरेव मया कृतं निखिलाघतूलमहानलं |
तस्य पुत्रकळत्रमित्रधनानि संतु कृपाबलात्
ते महेश्वर शंकराखिल विश्वनायक शाश्वत || 6 ||

इति श्रीशिवमहापुराणे श्रीकृष्णकृत श्रीशिवपंचरत्नस्तुतिः |